योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०३२

द्वात्रिंशः सर्गः ३२

श्रीवसिष्ठ उवाच ।

यदा चितिः प्रसरति तदाहंताजगद्भ्रमः ।

असदेवाभ्युदेतीव स्पन्दादपि च वायुता ।। १

उदितोऽपि न खेदाय ब्रह्मरूपत्ववेदनात् ।

परमाय त्वनर्थाय जगच्छब्दार्थभावनात् ।। ५

रूपानुभवमादत्ते चक्षुःप्रसरणाद्यथा ।

चितिः प्रसरणात्तद्वज्जगद्विभ्रममास्थिता ।। ३

यासौ प्रसरति व्यर्थं चेत्याभावान्न सा सती ।

असत्कथं प्रसरति वन्ध्यापुत्रः क्व नृत्यति ।। ४

अयं त्वनुभवादेव मुधैवानुभवन्स्थितः ।

असदेवाननुभवन्स्वयमर्भकयक्षवत् ।। ५

अहंभावोऽपि दुःखार्थमहमित्येव वेदनात् ।

अवेदनान्नाहमतः स्वायत्ते बन्धमुक्तते ।। ६

तद्ध्यानं स समाधिर्वा यदवेदनमासितम् ।

अजडानां जडमिव समं शान्तमनामयम् ।। ७

द्वैताद्वैतसमुद्भेदैर्वाक्यसंदर्भविभ्रमैः ।

मा विषीदत दुःखाय विबुधा अबुधा इव ।। ८

असदाश्रयते दुःखं स्वप्नवद्धनवासनः ।

रूपालोकमनस्कारान्संकल्परचितानिव ।। ९

दुःखं सदेव नाश्नाति सुप्तवत्तनुवासनः ।

रूपालोकमनस्कारान्संकल्परहितानिव ।। १०

अत्यन्ततनुतामेत्य वासनैवैति मुक्तताम् ।
देशकालक्रियायोगात्पदार्थे भावनामिव ।। ११
अत्यन्ततनुतां याता वासनैवैति मुक्तताम् ।
पराणुपरिणामेन खतां खेऽभ्रादिका यथा ।। १२
अहंभावनया बोधे वासना घनतानवा ।
विपश्चित्संगमाभ्यासात्पाण्डित्यमिव मूढता ।। १३
नाहमस्तीह मद्युक्त्या निश्चयोऽन्तः शमात्मकः ।
जीवतोऽजीवतश्चास्ति रूढबोध इति स्मृतः ।। १४
वायौ द्वन्द्वमिवात्रेदं जगदादि च भासते ।
कोऽहं कथमिदं चेति विचारेणैव शाम्यति ।। १५
नाहमित्येव निर्वाणं किमेतावति मूढता ।
सत्संगमविचाराभ्यामेतदाश्ववगम्यते ।। १६
क्षीयते तत्त्ववित्सङ्गादहमित्येव बन्धनम् ।
आलोकेनेव तिमिरं दिवसेनेव यामिनी ।। १७
कोऽहं कथमिदं दृश्यं को जीवः किं च जीवनम् ।
इति तत्त्वज्ञसंयोगाद्यावज्जीवं विचारयेत् ।। १८
जीवितं भुवनं भाति ततोऽहमिति नश्यति ।
तत्त्वमेकेन तज्ज्ञार्कसेवनात्स निषेव्यताम् ।। १९
यो यो बोधातिशयवांस्तं तं पृथगुपास्व भो ।
संगमे कथयोदेति तेषां वादपिशाचिका ।। २०
वादयक्षेऽप्यभ्युदिते बालस्येव विपश्चितः ।
युक्तियुक्तमलं मुख्यमुदेत्यहमिति भ्रमः ।। २१
अतः प्रत्येकमेकान्ते प्राज्ञः सेवेत पण्डितम् ।
एकीकृत्य तदुक्तांस्तानर्थान्बुद्ध्या विचारयेत् ।। २२
विचारयेत्तदुक्त्यर्थं बुद्ध्या बुद्धिविवृद्धये ।
सर्वसंकल्पमुक्तं यत्तत्सत्तन्मयतां व्रजेत् ।। २३

विपश्चित्संगमैर्बुद्धिं नीत्वा परमतीक्ष्णताम् ।

अज्ञानलतिका सैका कणशः क्रियतामलम् ।। २४

एषोऽर्थः संभवत्येव तेनेदं कथयाम्यहम् ।

स्वानुभूतं वयं बाला नासमञ्जसवादिनः ।। २५

व्योम्नोऽम्बुवाहादिविजृम्भयेव

तरङ्गभंग्येव महाजलस्य ।

न युज्यते नापि च नश्यतीह

नाशोदयौ निर्मननस्य किंचित् ।। २६

इदं हि सर्वं मृगतृष्णिकाम्बुव-

न्निरामये ब्रह्मणि शान्त आतते ।

विचारिते नाहमितीह विद्यते

कुतः क्व कस्मान्मननादिविभ्रमः ।। २७

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वाणप्रकरणे उत्तरार्धे सत्यावबोधनोपदेशो नाम द्वात्रिंशः सर्गः ।। ३२ ।।